न्धकवंशः। (यथा,कुमारे १। ८।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन"॥)
राक्षसविशेषः। इति शब्दरत्नावली॥ दैत्यभेदः। वृक्षविशेषः। इति विश्वः॥ नलः। इति राजनिर्घण्टः॥ केकयराजपुत्त्रः। स च विराटराजस्य श्यालः सेनापतिश्च॥ (यथा महाभारते ४। कीचकवधपर्व्वणि १३। ५।
"सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम्।
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव।
कीचकः कामयामास कामबाणप्रपीड़ितः"॥
अयन्तु छद्मवेशधारिणा विराटभवनस्थेन भीमसेनेन हतः। अस्य विवरणं महाभारते ४ पर्व्वणि १३ अध्यायमारभ्य द्रष्टव्यम्। देशविशेषः। तत्र बहुवचनान्तोऽयम्॥ यथा, महाभारते १।१५७।२।
"मत्स्यान् त्रिगर्त्तान् पाञ्चालान्कीचकानन्तरेण च।
रमणीयान्वनोद्देशान् प्रेक्षमाणाः सरांसि च"॥)

कीचकजित्, पुं, (कीचकं जितवान्। जि+भूते क्विप् तुक् च।) भीमसेनः। इति त्रिकाण्डशेषः॥ (पुराकिल दुष्टात्मा कीचकः विराटभवनस्थां सैरिन्ध्रीरूपधारिणीं द्रौपदीमकामयत। द्रौपदी तु तस्य कामुकस्य दुरभिसन्धिं विज्ञाय तं बहुल कटूक्त्या निर्भर्त्सयामास। अथ कीचक एवमपमानितः क्रुधा तां पदा ताड़ितवान्। अथ साभिमानिनी द्रौपदी निजदुःखं भीमं निवेदयामास। भीमस्तु एतदाकर्ण्य संजातरोषः कीचकं हन्तुं मनो दधे। अथ सुबुद्धिर्भीमो द्रौपदीं उपदिदेश श्वो निशायां यथा स दुरात्मा राजश्यालकः मत्स्यराजशुद्धान्तकन्यानर्त्तनशालायां त्वल्लोभेन समुपतिष्ठेत तथाऽस्यास्य समयो विधीयताम्। ततस्त्वद्वेशेन तत्र सङ्गतोऽहमेनं कामार्त्तं दुष्कार्य्यस्य फलं अनुभावयामि। एवं स्थिरीकृते द्रौपदी पूर्व्वोक्तमन्त्रितं स्थानं कीचकं विज्ञापितवती। अथ निशायां मूढ़बुद्धिः कामुकवेशधारी तत्रैव गतः प्रच्छन्नोपविष्टेन बलीयसा भीमेन पशुमारं निपातितः॥ एतद्विस्तृतिस्तु महाभारते ४। २१ अध्याये द्रष्टव्या॥)

कीचकनिसूदनः, पुं, (कीचकं निसूदयतीति। नि+सूद+णिच् ल्युः।) भीमसेनः। इति हेमचन्द्रः॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम्॥)

कीचकभित्, पुं, (कीचकं भिन्नवान्। भिद्+क्विप्।) भीमसेनः। इति भूरिप्रयोगः॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम्॥)

कीट, क बन्धे। वर्णे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क कीटयति कीटः। वर्णः कैश्चिन्नमन्यते। इति दुर्गादासः॥

कीटः, पुं, (कीट्+अच्।) कृमिजातिः। इति शब्दरत्नावली॥ (यथा मनुः १। ४०।
"कृमिकीटपतङ्गांश्च यूकामक्षिकमत्कुणम्"॥
"सर्पाणामेव विण्मूत्रशुक्राण्डशवकोथजाः।
दोषैर्व्यस्तैः समस्तैश्च युक्ताः कीटाश्चतुर्विधाः॥
दष्टस्य कीटैर्वायव्यैर्दंशस्तोदरुजोल्बणः।
आग्नेयैरल्पसंस्रावो दाहरागविसर्पवान्॥
पक्वपीलुफलप्रख्यः खर्ज्जूरसदृशोऽथवा।
कफाधिकैर्मन्दरुजः पक्वोदुम्बरसन्निभः॥
स्रावाढ्यः सर्व्वलिङ्गस्तु विवर्णः सान्निपातिकैः।
वेगाश्च सर्पवच्छोफो वर्द्धिष्णुर्विस्तरक्तता॥
शिरोऽक्षि गौरवं मूर्च्छाभ्रमः श्वासोऽतिवेदना।
सर्व्वेषां कर्णिकाशोफो ज्वरः कण्डूररोचकः"॥
अस्य चिकित्सा यथा।
"अर्कस्य दुग्धेन शिरीषबीजं
त्रिर्भावितं पिप्पलीचूर्णमिश्रम्।
एषो गदो हन्ति विषाणि कीट-
भुजङ्गलूतोन्दुरवृश्चिकानाम्"॥
इति च वाभटे उत्तरतन्त्रे ३७ अध्याये॥
अस्यौषधं यथा॥
"जतुसेव्यपत्रगुग्गुलुभल्लातककुभपुष्पसर्ज्जरसाः।
श्वेता एव धूम उरगाखुकीटवस्त्रकृमिनुदग्राः"॥
"क्षीरिवृक्षत्वगालेपः शुद्धः कीटविषापहः"॥
इति चरके चिकित्सास्थाने २५ अध्याये॥
"सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः।
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः॥
सर्व्वदोषप्रकृतिभिर्युक्ताश्चापरिणामतः।
कीटत्वेऽपि सुघोरास्ते सर्व्व एव चतुर्व्विधाः॥
कुम्भीनसस्तुण्डिकेरी शृङ्गीशतकुलीरकः।
उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गो मयूरिका॥
आवर्त्तकस्तथोरभ्रसारिका मुखवैदलौ।
शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः॥
शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः।
अष्टादशेति वायव्याः कीटाः पवनकोपनाः॥
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः॥ *।
कौण्डिल्यकः कणभको वरटी पत्रवृश्चिकः॥
विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा।
वाह्यकी पिच्चिटः कुम्भी वर्च्चः कीटोऽरिमेदकः।
पद्मकीटो दुन्दुभिको मकरः शतपादकः।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी।
क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः।
एते ह्यग्निप्रकृतयश्चतुर्व्विंशः प्रकीर्त्तिताः॥
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः॥ *।
"विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः।
सैरेयकः प्रचलको वलभः किटिमस्तथा॥
सूचीमुखा कृष्णगोधा यश्च काषायवासिकः।
कीटगर्द्दभकश्चैव तथा त्रोटक एव च॥
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः।
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः॥ *॥
तुङ्गीनासो विचिलकस्तालको वाहकस्तथा।
कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः॥
तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा।
अग्निकीटश्च घोराः स्युर्द्वादश प्राणनाशनाः॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्।
तास्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः"॥
"क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः।
ज्वराङ्गमर्द्दरोमाञ्चवेदनाभिः समन्वितः॥
छर्द्यतीसारतृष्णा च दाहो मोहविजृम्भिका।
वेपथुश्वासहिक्काश्च दाहः शीतञ्च दारुणम्॥
पिड़कोपचयः शोफो ग्रन्थयो मण्डलानि च।
दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च॥
तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः।
येऽन्ये तेषां विशेषास्तु तूर्णं तेषां समादिशेत्॥
एकजातीनतस्तूर्द्ध्वं कीटान् वक्ष्यामि भेदतः।
सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च॥
त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः।
चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः॥
तैर्दष्टस्य श्वयथुरङ्गमर्द्दो गुरुता गात्राणां दंशः कृष्णश्च भवति॥
"प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः।
तथा निरुपमश्चापि पञ्चगौधेरकाः स्मृताः॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्।
रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः॥

गलगोली श्वेतकृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिकेत्येवं षट् ताभिर्दष्टे सर्षपिकावर्ज्जं दाहशोफक्लेदा भवन्ति॥ सर्षपिकया हृदय पीड़ातिसारश्च॥

शतपद्यस्तु परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे शोफो वेदना दाहश्च हृदये। श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिड़कोत्पत्तिश्च॥

मण्डूकाः कृष्णः सारः कुहको हरितो रक्तो यववर्णाभो भृकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशकण्डूर्भवति पीतफेणागमश्च वक्त्रात्। भृकुटी कोटिकाभ्यामेतदेव दाहश्छर्द्दिर्मूर्च्छा चाति मात्रम्॥

विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिड़काभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति॥

अहितुण्डकाभिर्दष्टे तोददाहकण्डुश्वयथवो मोहश्च। कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारः ज्वरादिभिरभिहन्यते। शूकवृन्तादिभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते शूकञ्चात्र लक्ष्यते॥

पिपीलिकाः स्थूलशीर्षा सम्वाहिका ब्रह्मणिकाङ्गुलिका कपिलिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः॥

मक्षिकाः कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः स्थालिकाकाषायीभ्यामेतदेव पिड़काश्च सोपद्रवा भवन्ति॥

मशकाः सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च पार्व्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः॥ नखावकृष्टेऽत्यर्थं पिड़काः सदाहपाका भवन्ति। जलौकसां दष्टलक्षणमुक्तं चिकित्सितञ्च॥
भवन्ति चात्र॥
गोधेरकः स्थालिका च ये च श्वेताग्निसंप्रभे।
भृकुटी कोटिकश्चैव न सिध्यन्त्येकजातिषु॥
शवमूत्रपुरीषैस्तु सविषैरवमर्षणात्।
स्युः कण्डूदाहकोठाश्च पिड़कातोदवेदनाः॥
प्रक्लेदवांस्तथास्रावो भृशं सम्पाचयेत्त्वचम्॥